# Sambakrita Dvadasharyasuryastuti

# સૂર્યસ્તુતી દ્વાદશાર્યા સામ્બકૃત

## Document Information

Text title : sAmbakRitadvAdashAryAsUryastutiH

File name : sAmbakRRitadvAdashAryAsUryastuti.itx

Category : navagraha, stotra, dvAdasha

Location : doc_z_misc_navagraha

Transliterated by : Usha Rani Sanka usharani dot sanka at gmail.com

Proofread by : Usha Rani Sanka usharani dot sanka at gmail.com

Latest update : August 16, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# સૂર્યસ્તુતી દ્વાદશાર્યા સામ્બકૃત

અથ શ્રીસામ્બકૃતદ્વાદશાર્યાસૂર્યસ્તુતિઃ ।
ઉદ્યન્નદ્યવિવસ્વાનારોહન્નુત્તરાં દિવં દેવઃ ।
હૃદ્રોગં મમ સૂર્યો હરિમાણં ચાશુ નાશયતુ ॥ ૧॥

નિમિષાર્ધેનૈકેન દ્વે ચ શતે દ્વે સહસ્રે દ્વે ।
ક્રમમાણ યોજનાનાં નમોઽસ્તુતે નલિનનાથાય ॥ ૨॥

કર્મજ્ઞાનખદશકં મનશ્ચ જીવ ઇતિ વિશ્વસર્ગાય ।
દ્વાદશધા યો વિચરતિ સ દ્વાદશમૂર્તિરસ્તુ મોદાય ॥ ૩॥

ત્વં હિ યજૂરૃક્સામઃ ત્વમાગમસ્ત્વં વષટ્કારઃ ।
ત્વં વિશ્વં ત્વં હંસઃ ત્વં ભાનો પરમહંસશ્ચ ॥ ૪॥

શિવરૂપાત્ જ્ઞાનમહં ત્વત્તો મુક્તિં જનાર્દનાકારાત્ ।
શિખિરૂપાદૈશ્વર્યં ત્વત્તશ્ચારોગ્યમિચ્છામિ ॥ ૫॥

ત્વચિ દોષા દૃશિ દોષાઃ હૃદિ દોષા યેઽખિલેન્દ્રિયજદોષાઃ ।
તાન્ પૂષા હતદોષઃ કિઞ્ચિદ્ રોષાગ્નિના દહતુ ॥ ૬॥

ધર્માર્થકામમોક્ષપ્રતિરોધાનુગ્રતાપવેગકરાન્ ।
બન્દીકૃતેન્દ્રિયગણાન્ ગદાન્ વિખણ્ડયતુ ચણ્ડાંશુઃ ॥ ૭॥

યેન વિનેદં તિમિરં જગદેત્ય ગ્રસતિ ચરમચરમખિલમ્ ।
ધૃતબોધં તં નલિનીભર્તારં હર્તારમાપદામીડે ॥ ૮॥

યસ્ય સહસ્રાભીશોરભીશુ લેશો હિમાંશુબિમ્બગતઃ ।
ભાસયતિ નક્તમખિલં ભેદયતુ વિપદ્ગણાનરુણઃ ॥ ૯॥

તિમિરમિવ નેત્રતિમિરં પટલમિવાશેષરોગપટલં નઃ ।
કાશમિવાધિનિકાયં કાલપિતા રોગયુક્તતાં હરતાત્ ॥ ૧૦॥

વાતાશ્મરીગદાર્શસ્ત્વગ્દોષમહોદરપ્રમેહાંશ્ચ ।

ગ્રહણીભગન્ધરાખ્યા મહતીસ્ત્વં મે રુજો હંસિ ॥ ૧૧॥

ત્વં માતા ત્વં શરણં ત્વં ધાતા ત્વં ધનં ત્વમાચાર્યઃ ।
ત્વં ત્રાતા ત્વં હર્તા વિપદામર્ક પ્રસીદ મમ ભાનો ॥ ૧૨॥

ઇત્યાર્યાદ્વાદશકં સામ્બસ્ય પુરો નભઃસ્થલાત્ પતિતમ્ ।
પઠતાં ભાગ્યસમૃદ્ધિઃ સમસ્તરોગક્ષયશ્ચ સ્યાત્ ॥ ૧૩॥

ઇતિ શ્રીસામ્બકૃતદ્વાદશાર્યાસૂર્યસ્તુતિઃ સમ્પૂર્ણા ।

Encoded and proofread by Usha Rani Sanka usharani dot sanka at gmail.com

*Sambakrita Dvadasharyasuryastuti*
pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*